# ४१. किञ्चित् पाठयतु

परितः

अनीता - वत्से ! आगच्छतु, स्थालिकां स्थापयतु। भोजनं सिद्धम्।

पुत्री (राधिका) - अम्ब ! किम् अस्मिन् चषके शर्करा आसीत् ? चषकं परितः पिपिलिकाः सन्ति।

अनीता - अहो ! विस्मृतवती आसम्। चषकं क्षालयित्वा स्थापयतु। अनुजम् अपि आह्वयतु।

पुत्री - दिलीप ! उत्पीठिकां परितः पुस्तकानि स्थापितवान् खलु। सदा भवान् पुस्तकानि अव्यवस्थिततया एव स्थापयति। आगच्छतु भोजनार्थम्।

अनीता - दिलीप ! स्थालिकां परितः मा पातयतु। सम्यक् भोजनं करोतु।

दिलीपः - भगिनि ! 'परितः' शब्दस्य एकं वाक्यं वदतु। विद्यालये मम स्नेहितः मां पृष्टवान्। अहम् एवम् उक्तवान् - 'देवालयं परितः प्रदक्षिणं करोमि' इति। एतत् वाक्यम् अशुद्धम् उत शुद्धमस्ति ?

राधिका - वाक्यं शुद्धमेव अस्ति। एतादृशानि अन्यानि वाक्यानि यथा - 'गृहं परितः प्राकारः अस्ति।' 'दीपं परितः कीटाः सन्ति।' शिक्षकं परितः छात्राः सन्ति।'

अनीता - इदानीं मौनेन खादन्तु। अनन्तरं पाठयतु भवती।

दिलीपः - भोजनानन्तरं मम प्रकोष्ठम् आगच्छतु। किञ्चित् पाठयतु।